स्थिभवं संतक्षणेन, दारवं मृण्मयञ्च जह्यात् । अत्यन्तोपहतस्य प्रक्षालितस्य निरवद्य तच्छिन्द्यात्” विष्णुः “अत्यन्तोपहतानां सर्व्वतैजसानामग्निना शौचं मृण्मयचर्म्मणां त्यागः, तन्मात्रच्छेदमित्येके धारणं हि नववाससां शौचमित्याचार्य्याः तस्मात् सर्व्ववाससामाप्लावनादेव शुद्धिः” हारी० “तैजसानां कुणपरेतोमूत्रपुरीषोपहतानामावर्त्तनमुल्लेखनं भस्मना त्रिःसप्तकृत्वः परिमार्जनमुच्छेदनं वा” शङ्खलि० “मूत्रपुरीषासृक्कुणपस्पृष्टानां तैजसानां पात्राणां पूर्व्वोक्तानामन्यतमेन त्रिःसप्तकृत्वः परिमार्ज्जनम्” “क्षौमाणि वासांसि तेषामलाभे कार्पासिकान्यौर्णिकानि भवन्ति मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां मृदाद्भिः प्रक्षालनं वासोवद्दूर्व्वावल्कलानां, वल्कलवत् कृष्णाजिनानाम्” इति च बौधा० “मद्यैर्मूत्रपुरीषैश्च श्लेष्मभिरश्रुशोणितैः । संस्पृष्टं नैव शुध्येत पुनःपाकेन मृण्मयम् । एतैरेव यदा स्पृष्टं ताम्रसौवर्णराजतम् । शुध्यत्यावर्त्तितं पश्चादन्यथा केवलाम्भसा” शङ्खवशिष्ठकाश्यपाः “अलाबुदारुपात्राणां वैदलानां तथैव च । अत्यन्तोपहतानाञ्च परित्यागो विधीयते । अत्र मूत्रपुरीषाभ्यां रेतसा रुधिरेण च । चेलं यदुपहन्येत पुनः प्रक्षालयेत्तु तत् । यद्यम्भसा न शुध्येत्तु वस्त्रं वोपहतं दृढम् । छेदनं तस्य दाहो वा यन्मात्रमुपहन्यते । मृत्तिकाक्षारपातेन अशुद्धं तत् परित्यजेत्” यमः। “वस्त्रवैदलचर्मादेः शुद्धिः प्रक्षालनं स्मृतम् । अतिदुष्टस्य तन्मात्रं त्यजेच्छित्त्वात्मशुद्धये” वृह० । “दूषितं वर्जितं दूष्यं कश्मलं चेति लिङ्गिनाम् । चतुर्विधममेध्यं च सर्व्वं व्याख्यास्यते पुनः। शुच्यप्यशुचिसंस्पृष्टं द्रव्यं दूषितमुच्यते। अभक्ष्यभोज्यपेयानि वर्ज्जितानि हि वक्ष्यति । न्यङ्कुः पतितचण्डालौ ग्रामसूकरकुक्कुटौ । श्वा च नित्यं विवर्ज्याः स्युः षड़ेते धर्मतः समाः । सव्रणः सूतकी सूती मत्तोन्मत्तौ रजस्वला । मृतबन्धुरशुद्धश्च वर्ज्यान्यष्टौ स्वकालतः । स्वेदाम्बुविन्द्वःफेनोनिरस्तं नखरोम च। आर्द्रचर्म त्वगित्येतद् दूष्यमाहुर्द्विजातयः । मानुषास्थिकफोविष्ठारेतोमूत्रार्त्तवानि च । कुणपः पूयमित्येतत् कश्मलं चेत्युदाहृतम् । दूषिते प्रोक्षितेनापि शुद्धिरुक्ता विधानतः । दूष्ये मार्ज्जनसंस्कारैः कश्मले सर्व्वथा भवेत्” देवलः। अथ भूमिशुद्ध्यशुद्ध्युपायादि । “प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः । चण्डालैरुषितं यत्र यत्रोपन्यस्यते शवः । विण्मूत्रे चाहिते यत्र कुणपोयत्र दृश्यते । एवं कश्मल भूयिष्ठा भूरमेध्येति लक्ष्यते । कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी । तस्यया कर्षणैः क्षिप्ता वान्तैर्वा दूष्यतां व्रजेत् । नखदन्ततनूजत्वक्तुषपांशुरजोमलैः । भस्मपङ्कतृणैर्वापि प्रच्छन्ना मलिना भवेत् । पञ्चधा वा चतुर्द्धा वा भूरमेध्या विशुध्यति । दूष्या द्विधा त्रिधा वापि शोध्यते मलिनैकधा । दहनं खननं भूमेरुपलेपनवापने । पर्ज्जन्यवर्षणं चेति शौचं पञ्चविधं स्मृतम्” देव०।तथा घनीभूतश्लेष्मा “संमार्जनेनाञ्जनेन सेकेनोल्लेखनेन च । गवां च परिवासेन भूमिः शुध्यति पञ्चभिः” मनुः। “खननात् पूरणाद्दाहाल्लेपनादभिघर्षणात्। गोभिराक्रमणात् कालाद्भूमिः शुध्यति सप्तभिः” यमः। “घनाया भूमेरुपघाते उपलेपनम् सुषिरायाः कर्षणम् आच्छन्नाया मेध्यमाहृत्य प्रच्छादनम् चतुर्भिः शोध्यते भूमिः गोभिराक्रमणात् खननाद्दहनादभिघर्षणात् पञ्चमाल्लेपनात्” बौधा० “कर्षणमुपलेपनमद्भिरभ्युक्षणं कालोदाहश्च भूमेः” शङ्खलि०शुद्धिरिति शेषः। “खननात् पूरणाद्दाहाल्लेपनादभिघर्षणात् । गोभिराक्रमणात् कालात् भूमिरेभ्यो विशुध्यति” हारी०। “मार्जनोपाञ्जनैर्वेश्म प्रोक्षणेन च पुस्तकम् । मार्ज्जनेनाञ्जनेनापि सेकेनोल्लेखनेन च। दाहेन च भुवः शुद्धिर्वासेनाप्यथ वा गवाम्” विष्णुः “गोचर्म्ममात्रमब्विन्दुर्गोः (भूमेः) शोधयति पातितः समूढ़मसमूढ़ं वा यत्र लेपो न दृश्यते” बौधा० मृतौ वर्णादिशेषे कालभेदः । श्वशूद्रपतितास्त्वान्त्या मृताश्चेद् द्विजमन्दिरे । शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा । दशरात्राच्छुनि प्रेते मासात् शूद्रे भवेच्छुचिः । द्वाभ्यां तु पतिते गेहे अन्त्ये मासचतुष्टयात् । अत्यन्ते वर्जयेद्गेहमित्येवं मनुरब्रवीत्” वृ० मनुः । अत्यन्त्यः श्वपाकः । द्विजस्य मरणे वेश्मविशुध्यति दिनत्रयात् । दिनैकेन बहिर्भूमिरग्निक्षेपप्रलेपनैः” यमः। यथोक्तकालानन्तरं कर्त्तव्यमाह संवर्त्तः “गृहशुद्धिं प्रवक्ष्यामि अन्तःस्थशवदूषिते । प्रोत्साय्य मृण्मयं पात्रं सिद्धमन्नं तथैव च । गृहादपास्य तत्सर्वं गोमयेनोपलेपयेत् । गोमयेनोपलिप्याथ छागेनाघ्रापयेद्बुधः । ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिभिः । सर्व्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयः । “दारुवदस्थिभूम्योरावपनं च भूमेः” गौत० “मार्जनाद्वेश्मनां शुद्धिः” क्षितेः शुद्धिस्तु सप्तभिः” शङ्खः। अशुद्ध्यपवादः “ब्राह्मणावसथे भूमिर्देवागारे तथैव च । मेध्या चैव सदा मन्ये गवां गोष्ठे च या भवेत्” यमः। “रथ्याकर्द्दमतोयानि नावः पन्थास्तृणानि च। स्पर्शनान्न प्रदुष्यन्ति पक्वेष्टचितानि च” परा०